© 2022 IJNRD | Volume 7, Issue 5 May 2022 | ISSN: 2456-4184 | IJNRD.ORG

IJNRD.ORG ISSN : 2456-4184

INTERNATIONAL JOURNAL OF NOVEL RESEARCH AND DEVELOPMENT (IJNRD) | IJNRD.ORG

An International Open Access, Peer-reviewed, Refereed Journal

# "एकोद्दिष्टश्राद्धपार्वणश्राद्धयो: कर्मकालविचार:"

AUTHOR :

Dr.DAYANIDHI MISHRA

QUALIFICATION :

M.A & PH.D IN DHARMASHASTRA (SANSKRIT)

DESIGNATION :

LECTURE IN DHARMASHASTRA AT- SRI SRI ANANTA NARAYAN SANSKRIT COLLEGE , AYATPUR , KENDRAPARA , ODISHA

ABSTRACT :

अत्र विज्ञायते यत् मन्वादयधर्मशास्त्रकाराणां वचनमाधारीकृत्य पार्वणश्राद्धएकोद्दिष्टश्राद्धयो: कर्मकालविषयै समाधानंभवति पार्वणश्राद्धे अपराह्णो मुख्यकाल: एवं च सायाह्न: गौणकालरूपेण ग्रहणीयम् इति व्यासवचनं श्रूयते।एकोद्दिष्टश्राद्धसमय:तथैव अर्थात् मध्याह्ने पितृपुरुषाणां कृते श्राद्धं क्रियते।

SUBJECT :

श्राद्धं नाम पितृ पुरुषउद्देश्येन श्रद्धया अदनीयस्य द्रव्यस्य त्याग:श्राद्धमिति सर्वेषां धर्मशास्त्रकाराणामाशय:।अस्मिन् प्रसंगे मरीचिना -

प्रेतं पितृंश्च निर्द्दिश्य त्याज्यं यत् प्रियमात्मन:।

श्रद्धया दीयते यद्यत्तच्छ्राद्धं परिकीर्त्तितम्।।

श्राद्धे पितु: उद्देश्येन यानिद्रव्याणि देयत्वेन उपकल्पितानि मनसि,तेषां द्रव्याणि ब्राह्मणद्वारा तस्य स्वीकारो भवति। यथा मनु:प्रतिपादयति -

विप्रस्वीकारपर्यन्तस्त्यागो द्रव्यस्य य: पितृ्ृन्।

उद्दिश्य मुख्यश्राद्धं तत्तदङ्गमितरं स्मृतम्।।

श्राद्धदेवता -श्राद्धदेवता: स्मृतौ दृश्यते -पितर: तद्रूपा: कल्प्यन्ते ।मुख्यत: पितृपुरुषा: कुत्र तिष्ठन्ति, ते केन प्रकारेण तृप्यन्ते इति केचित् न ज्ञायते। अत: तेषां कृते त्रिविधात्मकं श्राद्धं करणीयं भवति। यथा अग्नौकपणं, ब्राह्मणभोजनं, पिण्डदानञ्चेति। यथा स्मृतौ -

"वसुरुद्रादित्तिसुता: पितर: श्राद्धदेवता: ।"

अतएव पार्वणश्राद्धस्य कालनिरूपणाऽवसरे महर्षि शातातप:प्रतिपादयति -

"दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत् प्रकीर्त्तितम्।

अपराह्णे पितृणां तु तत्प्रदानं विशिष्यते।।"

हारीतेन पितृ्ृणां कृते पार्वणश्राद्धस्य कालः अपराह्न एव विचारितम्।अपराह्नस्तु पञ्चदशधा विभक्तं कृत्वा तस्य दिवसस्य दशमैकादशद्वादशभागात्मक इति।

अत्र शङ्खवचनं प्रमाणं करोति -

पूर्वाह्णे दैविकं कृत्यमपराह्णे पितृक्रिया।

ग्रहणे निशि वा कुर्य्यान्न रात्रौ पैतृके पुनः॥

अतः सायाह्नस्यापि कर्मकालविषये क्वचित् स्मर्यते यथा -दिनान्ते पञ्चनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः।उदये च तथा पित्र्ये दैवे चैव च कर्मणि॥अस्य वाक्यस्य विरोधवाक्यमपि दृश्यते।यथा यमेन उक्तम् -सायाह्नस्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र

न कारयेत्।राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु॥एतस्मिन् क्षेत्रे मनुुवचनं स्पष्टीकरोति यथा - "तया श्राद्धस्य पूर्वाह्नादपराह्णो विशिष्यते।"

अतः दिवसभागस्य अपरार्द्ध एव अपराह्न उच्यते।कदाचित् कार्यवशात् पार्वणश्राद्धस्य सहसा कार्यत्वे सति दिवसापरभाग एव कार्यं न पूर्वभाग इत्यत्र एव

तात्पर्यम्।पूर्वभागः देवतानां  कृते एव।अत्र एकस्मिन् वाक्ये 'पञ्चनाड्यस्तु पुण्याः'इति कथ्यते। अन्यस्मिन् वाक्ये  दिवाभागस्यान्तिम

त्रिदण्डाः श्राद्धे इति प्राप्यन्ते।

अत्र एकोद्दिष्टश्राद्धविषये कण्वः प्रतिपादयति -

"एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्त्तितम्।"

एकं पुरुषमुद्दिश्य यत् श्राद्धं क्रियते तदेकोद्दिष्टमभिधीयते। एकोद्दिष्टश्राद्धस्य अनुष्ठानं पार्वणश्राद्धविध्यनुसारेण क्रियते ।अतः एकोद्दष्टश्राद्धस्य कर्मकालः मध्याह्नः।अतः मध्याह्न व्यापिनी ग्राह्या इति।अतएव प्रेतश्राद्धमेकोद्दिष्टविधिना भवति।साधारणतः पितृकार्योद्देश्येन प्रतिपत्तिथि अपराह्णजनितः प्रयुज्यते।पितुः कर्म द्विप्रकारकं भवति। यथा- एकोद्दिष्टं पार्वणं चेति। द्विप्रकारकं स्वरूपं काण्वेनोक्तम् -एकमपि पुरुषमुद्दिश्य यत् पिण्डदानादिकं क्रियते तदेकोद्दिष्टमित्युच्यते। त्रिपुरुषोद्देश्येन यत् श्राद्धं क्रियते तत् पार्वँणपदेन अभिधीयते।यदि कश्चन जनः म्रियते  तस्य कृते मासिकश्राद्धमागामिनः मासस्य प्रतिपत्तिथौ क्रियते। तस्य प्रथमवार्षिकश्राद्धं पार्वणश्राद्धविधिना  क्रियते। मरिचिशातातपाभ्यामुक्तम् -

आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यमे।

पार्वणं चापराह्ने तु प्रातर्वृद्धिनिमित्तकम्॥

यदि केनापि वाधक्न श्राद्धं कर्त्तुं करत्ता असमर्थो भवति, तदा स आमश्राद्धं कुर्यात् ।आम नाम अपक्वद्रव्यम् । अतः आमश्राद्धं पूर्वाह्ने भवति।एकोद्दिष्टं मध्याह्ने भवति। पार्वणश्राद्धमपराह्णे भवति, शुभकर्मणि वृद्धिश्राद्धमर्थादाभ्युदयिकश्राद्धं प्रातः कर्त्तव्यम्।

प्रतिमासं मृतस्य जनस्य मृत्युसंवत्सरे सपिण्डिकरणात्प्राक् मासिकश्राद्धस्य अनुष्ठानमेकोद्दिष्टविध्यनुसारेण कर्त्तव्यमिति पैठीनसिना प्रतिपादितम्। मुहूर्त्तत्रयविशिष्टः मध्याह्नः एकोद्दिष्टश्राद्धस्य कर्मकालः।यथा गान्धर्वः,कुतपः ,रोहिणमुहूर्त्तश्च। एकोद्दिष्टश्राद्धं तु मध्याह्ने षष्ठमुहूर्त्तादारभ्य दशमुहूर्त्तं यावत् गान्धर्वकुतपरोहिणेषु अनुष्ठीयन्ते। गान्धर्वकुतपरोहिणाःसप्तमाष्टमनवममुहूर्त्ताः भवन्ति।एतेषु कुतपमुहूर्त्ते एकोद्दिष्टश्राद्धं कर्त्तव्यम्। तत्रापि मध्यममुहूर्त्त :कुतपो भवति।

अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्वदा ।

तत्राष्टमो मुहूर्त्तो यः स काल कुतपः स्मृतः ॥

दिवसभागः पञ्चदशमुहूर्त्तात्मकः। तेषु अष्टमे मुहूर्त्ते यः कालः स एव कालः कुतपनाम्ना प्रसिद्धः । अस्मिन् समये दवाकरः मध्यह्ने सर्वदा मन्दो भवति।यदि मध्याह्ने पितृपुरुषाणां कृते श्राद्धं क्रियते तर्हि तस्मात् अनन्तफलं प्राप्यते। यदि सप्तमनवममुहूर्त्तकाले श्राद्धं क्रियते तर्हि फलं प्राप्यते।परन्तु अनन्तफलं न प्राप्यते।षाण्मासिकं, सांवत्सरिकम् ,ऊनसांवत्सरिकं चएकोद्दिष्टविधिना कर्त्तव्यम्। एकोद्दिष्टश्राद्धे अपराह्नव्यापीनी तिथिः ग्रहीतव्या इति वृद्धमनुनाऽपि प्रतिपादितम्। यस्यां  तिथौ सूर्यः अस्तं याति  तस्यां तिथौ पितरुपासना क्रियते। यतः ब्रह्मणा अपराह्नकालः पितृभ्यो दत्तः।

वौधायनेनाऽपि उक्तम् - सूर्योदयव्यापिन्यां तिथौ दैवकर्म क्रियते ,सूर्यास्तव्यापिनीसमये पैतृककर्म क्रियते। या तिथिः मध्याह्नव्यापिनी सा तिथिः एकोद्दिष्टश्राद्धनिमित्तं प्रशस्ता भवति।

## REFERENCE :

धर्मशास्त्रकारः प्रथमप्रणेता भगवान मनुः तस्य मानवशास्त्रं नाम मनुस्मृतिग्रन्थे कुल्लुकभट्टविरचितमन्वार्थमुक्तावल्यायां श्राद्धस्य व्यवस्था दृश्यते। याज्ञवल्क्यस्मृतौ आचाराध्यायस्य श्राद्धप्रकरणे, महामहोपध्यायकृष्णमिश्रकृतकालसर्वस्वम् इति ,माधवाचार्यकृतः कालमाधवः,कमलाकरभट्टविरचितनिर्णयसिन्धुइति शास्त्रे श्राद्धस्य कालाः निरूपिता : ।:
कालमाधवः,कमलाकरभट्टविरचितनिर्णयसिन्धुइति शास्त्रे श्राद्धस्य कालाः निरूपिता : ।